

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

T. C. Himavathi ammal
1763 Mission Hospital Road
Mandi ~~Myody~~ Mohalla
Mysore

—

டி. சி. ஹைமவதி அம்மாள்
1763 மிஷின் ஹாஸ்பிட்டல் ரோடு
மண்டி மொஹல்லா
உ3/2 மைசூர்.

═

22

- श्रीः -

- श्रीमते रामानुजाय नमः -
- श्रीहयवदनपरब्रह्मणे नमः -

~~[illegible]~~ तिरुनारणैय्यङ्गार्य विरचितया
बालबोधिनी
इत्याख्यया व्याख्यया सहिता

लघुकौमुदी

प्रारब्धदिनं २-३-१९३९ (2-3-1939)

समाप्ति दिनं
भा॥ पं॥ नरसिंहाचार्यैः (श्रीवगिपुरं नंबि मलः)

॥ श्री यदुगिरिः ॥ (मेलुकोट)
(यतिशैलं)

R. Lakshmibai Ammal
Appu Chetty Street
Shevapet
Salem

श्रीः

श्रीमते रामानुजाय नमः

## पीठिकाप्रकरणम्

1 पेर नंबर 1 व्याक्रियन्ते विशेषेण आक्रियन्ते
तत्तत्प्रकृतिविकृत्याद्याकारविशिष्टाः
क्रियन्ते शब्दाः अनेनेति व्युत्पत्त्या शब्दप-
रिष्कारबोधकं शास्त्रं व्याकरणमुच्यते॥

(पेर नम्बर 2)॥ अनेन च शब्दानां सुबन्तति-
ङन्तात्मना प्राधान्येन प्रकृतिप्रत्ययवि-
भागः शब्दान्तरेण सहान्वययोग्यता प्रत्या-
यकसंसर्गः स्वार्थेन सह वाच्यवाचक-
10 भावविषया व्युत्पत्तिश्चेत्येवमादिकं बहु
प्रयोजनमुपलभ्यते तत्र तिङन्तशब्दानां
प्रकृतिर्धातुरित्युच्यते। तिङिति
तिङ् प्रत्याहारघटकाः तिप्, तस्, झि,।
सिप्, थस्, थ,। मिब्, वस्, मस्,॥ त, तां,
झ,। थास्, आथां, ध्वं,। इड्, वहि, महिङ्॥ इत्य-
ष्टादश प्रत्ययाः गृह्यन्ते। तदन्ताः धातवः
तिङन्ताः इत्युच्यन्ते। तेषामेव प्रत्ययानां
नवात्मनेपदसंज्ञिकाः त, तां, झ, इत्यादयः

नव परस्मैपद संज्ञिकाः तिप्, तस्, झि, इत्यादयः। एषु प्रत्येकशः ÷

- आत्मनेपदे -

| | | |
|---|---|---|
| त | आतां | झ |
| थास् | आथां | ध्वं |
| इट् | वहि | महिङ् |

इति त्रयस्त्रयः प्रथम, मध्यमोत्तम संज्ञिकाः भवंति। एवं परस्मैपदेऽपि॥

॥ (पेर नंबर 3) एवं धातोस्सकाशात् येऽन्येऽपि प्रत्यया भवन्ति तेषां कृदिति संज्ञा भवति। एवं च धातोस्तिङ् संज्ञकाः कृत्संज्ञिकाश्च प्रत्यया विधीयंते। तदुत्तरत्र वक्ष्यते सूत्रकारेण कृदतिङ् इति॥

॥ (पेर नंबर 4) एवं सुबन्तशब्दानां प्रकृतिः प्रातिपदिकं संज्ञा भवति। (1) कृदंताः (2) तद्धितांताः (3) समासाः (4) अव्ययानि (5) अनुकरणानि (6) कानिचिदव्युत्पन्नानि च शब्दस्वरूपाणि प्रातिपदिक संज्ञिकानि भवन्ति। एभ्यस्सुप् संज्ञिकाः—

| | | |
|---|---|---|
| सु | औ | जस् |
| अम् | औट् | शस् |
| टा | भ्यां | भिस् |

| | | |
|---|---|---|
| ङे | भ्यां | भ्यस् |
| ङसि | भ्यां | भ्यस् |
| ङस् | ओस् | आं |
| ङि | ओस | सुप् |

इत्येकविंशतिः प्रत्ययाः सप्तधा विभक्ताः प्रत्येकशः प्रथमादि सप्तमांत तत्तत्संख्या संख्येयविभक्तिसंज्ञया प्रवर्तंते ॥

॥ (पेरनंबर (5) तत्र तद्धितसंज्ञिकाः प्रत्ययाः 'समर्थानां प्रथमाद्वा' इत्यादिना

50 वक्ष्यंते। ते तु प्रथमादिविभक्त्यन्ताद्भवंति। तत्रत्या रूपप्रक्रिया स्तत्प्रकरणे स्पष्टं वक्ष्यंते॥

॥(पेरनंबर 6) एवं च प्रत्ययाः कृतः, तद्धितान्ताः, तिङः, सुप इत्येति चतुर्विधाः॥

॥ (पेरनंबर 7) प्रकृतयश्च धातुः, प्रातिपदिकं चेति द्विविधाः एवं विध प्रकृति प्रत्यय विभाग विज्ञानं विना शब्दप्रयोगो दुश्शक इति व्याकरणशास्त्रं तज्ज्ञानायोपयुज्यते, तत्र:-

ऐन्द्रं चान्द्रं काशकृत्स्नं ॥

कौमारं शाकटायनम् ॥

60 सारस्वतं चापिशलम्।

शाकल्यं पाणिनीयकं ॥

इन्द्रः, चन्द्रः, काशकृत्स्नः, कुमारः, शाकटायनः,

सरस्वती, आपिशलः, शाकल्यः, चेति प्राचीनाः
अष्टौ निबंधारः निर्बबंधुर्बहूनि ग्रंथजातानि।
अथापि तेषु विस्तरवैयर्थ्य संक्षेपादिभिः
अर्थानां दुर्बोधतया पाणिन्याचार्यैः सुबोधं
अष्टभिरध्यायैः परिकल्पितं सूत्रजातं नि-
बद्धं पाणिनीयं व्याकरणशास्त्रमिति सु
प्रसिद्धं वर्तते तत्रैकैकस्मिन्नध्याये चत्वारः पादाः
सन्ति तत्रत्यानि सूत्राणि च संज्ञा, परिभाषा, विधि,
अधिकारेति नामिकानि चतुर्विधानि तत्र तत्र-
स्फुटीभविष्यन्ति॥

॥(पैरनंबर४) एषां सूत्राणां महाभाष्यादि
बहुग्रंथसाध्यतया अन्वयेनार्थबोधस्य दुर्लभ-
तया भट्टोजिदीक्षितेन सिद्धान्तकौमुदीनाम्नी
सुस्पष्टार्थीकापि कृतिर्व्यलेखि। सा च व्याकरण
शास्त्रे इदं प्रथमप्रविष्टानां बालकानां बहुकालाभ्या
ससाध्यतया वरदराजपंडितेन लघुकौमुदी
सिद्धांतकौमुदीस्थवाक्यैरेव संगृहीता। अस्मा
भिस्तत्रापि बालानां दुर्बोधतां आलोच्य बिद्वज्ज
नप्रेरणया सूत्रघटितपदार्थव्युत्पत्त्यै तत्र तत्र
दीक्षिताभिप्रायपदानां स्फुटप्रकाशनायायं
संदर्भः समारभ्यते अयं च कौमुदीमध्येतुकामा
नां अत्यंतोपकाराय भवति॥ इदं च व्याकर

## प्रस्तावना

शास्त्रे तत्र तत्सूत्रेषु वेधितार्थबोधाय संज्ञास्त्रैः केचित्संकेताः उपदिश्यंते ॥

॥ (पेरा नंबर 1) तेषु (1) अण (2) अक (3) अच, (4) अट, (5) अल (6) अश (7) इण (8) इक (9) इच (10) एङ् (11) एच (12) ऐच् ओङ् (13) हल (14) हश (15) वश (16) वय (17) वल (18) रल (19) यण, (20) झय (21) झल (22) झष (23) जश (24) बश (25) खर (26) छव (27) चर (28) शल (29) शर इत्यादि रूपाः प्रत्याहारसंज्ञिकाः प्राधान्येन प्रवृत्ताः। एताश्च प्रायशः सर्वेषु सूत्रेषु अर्थबोधायात्यंतमपेक्षिताः यथा :-

इको यणचि इति सूत्रे इक, यण, अच, इति शब्दत्रयं प्रत्याहारात्मकं संज्ञास्वरूपापरिज्ञाने बोद्धुमेव न शक्यते ॥

॥ (पेरा नंबर 10) (1) इत्, (2) लोपः (3) ह्रस्वं (4) दीर्घं (5) प्लुतं (6) उदात्तं (7) अनुदात्तं (8) स्वरितं (9) अनुनासिकं (10) सवर्णं (11) संहिता (12) संयोगः (13) (14) पदं (15) प्रातिपदिकं (16) गुणः (17) वृद्धिः (18) अपृक्तः (19) वृद्धं (20) अव्ययानि (21) धातु (22) सर्वनामानि (23) उपसर्गाः (24) टी (25) नदी (26) घी (27) भ (28) प्रगृह्यं इत्याद्या अपि संज्ञाः संज्ञासूत्रेषूपादिश्यन्ते ॥

॥ (पेरा नंबर 11) एतासु संज्ञासु काश्चन

बहुषु सूत्रेष्वर्थबोधसौकर्यायापेक्ष्यन्ते। ता:
सिद्धान्तकौमुद्यां लघुकौमुद्यां च संज्ञाप्रकर
णे प्रदर्शिता: काश्चिच्च कानिचन सूत्रे
110 षु अपेक्षिता: न बहुत्र व्याप्नुवन्ति। ताश्च तत्त
दावश्यकप्रकरणेषु प्रदर्श्यन्ते॥

इति श्री राजाधिराज यतिराज
प्रीतिपात्रे यतिशैलनिवस
त: गोमठं निरुनारण
स्यंगार्यस्य कृतौ
लघुकौमुदी व्या
ख्यायां बालबोधि
न्याख्यायां व्याख्या
120 यां पीठिकाप्रक
रणं समाप्तं

10-11-1939

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



- श्रीः -

130 श्रीमते रामानुजाय नमः

## — अथ संज्ञाप्रकरणम् —

(पेरनंबर १२) प्रकृते च पाणिन्याचार्यैः तपःश्री-
प्रीतादीश्वरात् :—
(१) अ इ उ ण् (२) ऋ ऌ क् (३) ए ओ ङ् (४) ऐ औ च्
(५) ह य व र ट् (६) ल ण् (७) ञ म ङ ण न म् (८) झ भ
ञ् (९) घ ढ ध ष् (१०) ज ब ग ड द श् (११) ख फ छ ठ थ
च ट त व् (१२) क प य् (१३) श ष स र् (१४) हल् ॥ इति
140 चतुर्दश सूत्राणि लेभे। तान्येवाष्टाध्याय्या मूल
भूतानि ताभिरेव चतुर्दशभिस्सूत्रैः वीडिका
प्रकरणोक्ताः अण्, अक्, अच्, इत्यादयः
प्रत्याहारास्सिध्यन्ति। ते च बहूनां अक्षरा-
णां संग्राहकतया प्रत्याह्रियन्ते संगृह्य बोध्यं
ते ताभिः इति व्युत्पत्त्या प्रत्याहारा इति व्य
पदिश्यन्ते एतेषु चतुर्दशसूत्रेषु आद्य
क्षराणां अ इ उ इत्यादीनां अंत्याक्षरैर्णकइ
त्यादिभिः मेलनेन अण् अक्, अच्, अ
श, इण्, इत्यादयस्सिध्यन्ति। ते ते च आद्याक्षर
150 रं यस्मिन सूत्रे वर्तते अंत्याक्षरं च-

सूत्रांत्ये वर्तते तत्सूत्रस्थ तदक्षरमारभ्य
अंत्याक्षरविशिष्टतादृशसूत्रांतर्गत्यवर्णप
र्यंतानां वर्णानां ग्राहका भवंति यथा-
अच् इति (1) अ इ उ ण् सूत्रस्थ अकारमारभ्य
(4) ऐ औ च् सूत्रस्थ चकारपर्यंतं वर्तमानान्
अ इ उ ऋ ऌ ए ओ ऐ औ वर्णान् बोधयति
एवं प्रत्याहारसौकर्यार्थं पठितानि चतुर्दश सूत्रा
णि माहेश्वरादागतानीति व्युत्पत्त्या माहेश्वरा
णीति व्यवह्रियंते । महेश्वरशब्दादण् प्रत्ययः । एषु
सूत्रेषु अकारमारभ्य हकारपर्यंतानि त्रि
चत्वारिंशदक्षराण्येवोपात्तानि इत्यपि वदंति
अक्षरसमाम्नायः शास्त्रं इत्यक्षरसमाम्नाय
इत्यपि वदंति ॥

॥(पेर नंबर ।3) अत एव एषु सूत्रेषु
तान्यदक्षराण्यक्षरसमाम्नायिकानी
ति सिद्धांतकौमुद्यामुक्तं अक्षरसमा
म्नायशब्दाघटकप्रत्ययः ॥

॥5॥ ॥(पेर नंबर ।5) एषां उक्तानां प्रत्या
हाराणां ग्राहकं सूत्रं

(5) आदिरन्त्येन सहेता (1.1.71)

इति । आदिः, अंत्येन, सह, इता, इति छेदः ।
अंत्येनेति तृतीया सहेति सहितार्थक

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



'मव्ययं इत्ता इति तृतीया अंतेभवमंत्यं
तच्च इतेस्यत्र विशेषणं इतीति सह योगाद्
प्रधाने तृतीया सहपदद्वारा प्रधानेनाति पदे
नान्वेति 'इत' च पुत्रेण सहागतः पिता इ
त्यादौ पुत्रादेः न पित्रा द्यन्वायकत्व इत्य
वर्णस्य संज्ञा॥

॥(पेर नंबर ।5) एवं चांत्येनेत्यंति
190
मेन इत्ते ती सांद्रकेन वर्णेन सहेति सहितः
आदि रित्यादिभूतोवर्णः इति अण इत्यादयः
अण् प्रत्याहाराः अनेन सूत्रेणोपदिष्टा
भवंतीति सूत्रार्थः॥ तदाहवृत्तौ । 'अंत्येनेना
सहित आदिरिति' एवं अण इत्यादीनां अक्ष
रघटनात्मक संज्ञा न निष्प्रयोजना भवति
सूत्रकर्तुर्व्यर्थप्रयासत्वापत्तेः। अतः एभिः
प्रत्याहारैः कश्चिदर्थो ज्ञातव्यः स्यात् अ
त स्तदुभयमध्यवर्तिनः तदादिमवर्णाश्च
एवमर्थो भवतीत्यर्थात् सिध्यति तदेतदाह:
200
मध्यगानां स्वस्य च संज्ञास्यादिति उदाहर
ति यथा अणिति अ इ उ वर्णानां संज्ञा एवं
अक, अच, हल, अल इत्यादयः इति॥5॥
॥1॥ ॥(पेर नंबर ।6) अस्य सूत्रस्येति
पदघटितस्य पदार्थज्ञान सापेक्षतया घटक-

ज्ञानं प्रति घटितज्ञानं कारणमिति न्यायेन तदर्थज्ञानकारणीभूत तत्पदार्थज्ञानसाधनं सूत्रं प्रथममाह दीक्षितः

(1) हलन्त्यं (1.3.3) इति हल् अन्त्यं, इत्सि...
अन्ते भवमन्त्यं हलि + अन्त्य = हलन्त्यं इति विग्रहः उपदेशेऽजनुनासिक इत् इति सूत्रादितीत्यनुवर्तते हल पदं इत्सूत्रस्य हकं परं हलीति सप्तम्याः वृत्तिव मर्थः॥

॥(पैरनंबर।7) एवं च हलन्त्यमिति हल् सूत्रस्यान्त्य वर्णः इदिति इत्संज्ञिको भवतीति एकोवाक्यार्थः॥

॥(पैरनंबर।8) अनेन च इत्पदार्थ ज्ञाने जाते अनन्तरं आदिरन्त्येनेति सूत्रार्थज्ञानं भवति एतेन जातेपीत्पदार्थज्ञाने आदिरन्त्येनेति सूत्रेण हल् सूत्रस्य लकारेण साकं आदिवर्णानां अकार, इकार, उकार, ऋकार, अकार, ज्ञकार, ळकारादीनां प्रत्याहारसिध्यति अइउण्वादि सूत्रस्यान्त्यवर्णः अकारादीनां नासिध्यति णकारादीनां इत्संज्ञायाः अलाभात् मनसो ...मपीसंज्ञासिध्यर्थं सूत्रमेतदावश्यकं तात्पर्यार्थः

तत्त्वमुक्तौ
[margin: तत्त्वमुक्तौ] कौमुद्यां हल्, अन्त्यं इति छेदेन। उपदेशेऽजनुनासिक इदिति सूत्रात् उपदेशे, इत् इति च पदद्वयमनुवर्त्तते आद्योच्चारणविषयीभूता धातुसूत्रादयः तदुक्तं धातुसूत्रेति अन्त्यमित्यन्तिमं हलिति हल् उपदेशे इति धातुसूत्रादौपदेशावृत्ति प्रत्याहार घटकं अर्थात् व्यंजनं इवितिसंज्ञकं भवति इति तदिमं द्वितीय वाक्यार्थः। तदाह वरदराजः उपदेशेंत्यं हलित् स्यादिति॥

[margin: 230]

॥(पेर नंबर।१) अत्र च हल् पदार्थ ज्ञानं विना हलंत्यसूत्रस्य द्वितीयवाक्यार्थज्ञानं न ज्ञायते हल् पदार्थ ज्ञानं च आदिरंत्येन सहेतेत्यादि तिप्रत्याहार नियामक सूत्रेण। सिध्यति इति सदार्थस्य हल् पदार्थस्य च ज्ञानं विना सूत्रद्वयस्यापि स्वस्वार्थबोधं प्रति घटितज्ञान सापेक्षत्व नियमानुरोधेन परस्पराश्रयदोषप्रसक्तौ तत्परिहारार्थं हलंत्यसूत्रस्य प्रथमवाक्यार्थः आवश्यकः अत एव सिद्धांतकौमुद्यां हलंत्यसूत्रं द्विरावर्त्य वाक्यार्थद्वयमपि प्रत्यपादि तथा हलंत्यसूत्रस्य प्रथमवाक्यार्थेन हल् सूत्रांत्य लकार-

[margin: 240]

स्येत्संज्ञायां आदिरन्त्येन सहेतेति सूत्रेण
250 हल् प्रत्याहारज्ञाने जाते हलन्त्यम् सूत्रस्य
द्वितीयवाक्यार्थज्ञानं निष्पन्नं हि॥

॥(पैरनंबर २०) लघुकौमुद्यां तु द्वि
रावृत्तिर्न कृता एकवारोपात्तस्यापि वा
हलन्त्यसूत्रस्य उक्तविधया प्रथमवाक्या
र्थोऽपि नैव प्रदर्शितः अतस्तत्र अन्यो
न्याश्रयदोषो न परिहृतः अतश्च तत्प
रिहारार्थं प्रथमनिरूपितवाक्यार्थः अ
वश्यं उपादाय एकेति सर्वं चतुरस्रम्॥

॥(पैरनंबर २१) किं चात्र लण्म
260 ध्ये त्वित्संज्ञकः इत्युक्तं तस्य च लण्सूत्रम
ध्ये अकारोत्तरवर्ति रकार ऋ इत्संज्ञक इ-
त्यर्थः तस्येत्संज्ञायाः जातप्रयोजनं दृ
श्यते तस्य प्रयोजनं तु (२०) उरण् रपरः
(१.१.५१) इति सूत्रव्याख्यानावसरे द्रष्टव्यं
प्रकृते च तदुक्तिः प्रयोजनाजिज्ञास
या कौतुकानां सुबोधा (२७) उपदेशेज
नुनासिक इत् (१.३.२) इति सूत्रेण
तद्विधानात् तत्रैव तस्य सुबोधत्वात्
॥२॥ ॥(पैरनंबर २२) अत्रैव संदर्भे
270 इत्संज्ञकानां लोपविधानाय (३) तस्य

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



लोपः (1.3.9) इति सूत्रे उपादानं करदराजः तद्बोधित लोपपदार्थज्ञानाय (2) अदर्शनं लोपः (1.1.60) इति सूत्रं लोपसंज्ञा बोधकं प्रथममाह :

(2) अदर्शनं लोपः (1.1.60) इति

अदर्शनं, लोपः, इति छेदः। न दर्शनं अदर्शनं दर्शनं चात्र वर्ण विषयकं उच्चारणात्मकं तदभावस्य यस्य वर्णस्योच्चारणं प्रसक्तं तस्यैवेत्यर्थाल्लभ्यते ॥

280 ॥(पैरनंबर 23) एवं च अदर्शनमिति उच्चारणीयतया प्रसक्तस्य वर्णस्यानुच्चारणं लोपइति लोपसंज्ञिकं भवतीति सूत्रार्थः तदुक्तं वरदराजेन:- प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् इति ॥

॥3॥ ॥(पैर नंबर 24) एवमनेन सूत्रेण लोप पदार्थज्ञाने जाते लोप पदविशिष्ट लोपविधायं सूत्रमाह :-

(3) तस्य लोपः (1.3.9) इति। तस्य, लोपः, इति, छेदः इदं सत्तमः ध्याय्यां इ संज्ञाप्रकरणान्ते वर्तते तत्रापि क्रमः।

2:90 (1) उपदेशेऽजनुनासिक इत् (1.3.2)

(2) हलन्त्यं (1.3.3)
(3) न विभक्तौ तुस्माः (1.3.4)
(4) आदिर्ञिटुडवः (1.3.5)
(5) षः प्रत्ययस्य (1.3.6)
(6) चुटू (1.3.7)
(7) लशक्वतद्धिते (1.3.8)
(8) तस्य लोपः (1.3.9) इति

300 अत्राद्यानि सप्तसूत्राणि इत्संज्ञाविधायकानि तत्र प्रकरणे विद्यन्ते हलन्त्यसूत्रं ~~विधि~~ इति द्वितीय सूत्रं अत्रैव प्रत्याहारविधायक सूत्रापेक्षया तेत्संज्ञा विधानाय विकृतं प्रकृते तदन्तिमसूत्रस्थं तस्य दं प्रक्रान्तेत्संज्ञापरः॥

॥(पैरनंबर 25) गावं च तस्येती संज्ञकस्य वर्णस्य लोप इति प्रत्याहारे ग्रहणात्मकं अदर्शनं भवतीति सूत्रार्थः॥

310 ॥(पैर नंबर 26) गावं (19) संयोगान्तस्य लोपः (8.2.22) (21) लोपः शाकल्यस्य (8.3.19) इत्यादि सूत्रेष्वपि लोपपदार्थो ज्ञातव्यः तस्य लोपः इति इत्संज्ञिक वर्णानां लोपविधायकं सूत्रं

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



प्रकृते नार्थं तमुपयुज्यते तस्य लोपसंधि
विधायकत्वेन (2) एचोऽयवायावः (6.1.78) इत्या
दि संधिप्रकरणमवन्तुमौचित्यात् प्रकृते चतु
र्दशसूत्रस्थेत्संज्ञकवर्णानां प्रत्याहारा
र्थं उपात्तत्वेन तेषां लोपस्यानति प्रयोजन
320 त्वाच्च। अथापि सूत्रान्तरीत्यवर्णैः सह अका
रादीनां प्रत्याहारेतु तदनन्तरभूतानां इत्व
र्णानां ण, क्, इत्यादीनां प्रत्याहारेषु ग्रहणं
माभूत् इत्येतदर्थं तेषां लोप आवश्यक इति
सत्यमिदम् लोपान्तं सिद्धान्तकौमुद्यां तु (1) मुख-
नासिकावचनोऽनुनासिकः इत्यादि सूत्रस्थेन अ
नुनासिक इत्यादि सूत्रकारनिर्देशेनैव प्रत्या
हारेष्वेतेषां न ग्रहणमिति उक्तं अनुनासिकपदे
सकारोत्तरवर्तीकारस्य ककारे परे यण् संधि
रावश्यकः ककारस्य अच्प्रत्याहारघटक (2)
330 ऋ, लृ, क् सूत्रस्थत्वेनाच् प्रत्याहारान्तर्भावात् अ
नुनासिकपदे संधेरकरणेन च ककारस्य
ऋ लृ क् सूत्रस्थत्वेपि अच्त्वं नास्तीति ज्ञायते
अत एवं अन्येष्वपि प्रत्याहारेषु इत्संज्ञकानां वर्णा
नां ग्रहणं नास्तीति सिध्यतीति सूत्रकारकृत
अनुनासिकादि पदव्यपदेशेन सिद्धस्यास्यार्थ
स्य संधिप्रकरण संगत लोपविधायक सूत्रेण

संपादनं नरमणीयमिति दीक्षिताशयः॥३॥
॥५॥ ॥(पैरनंबर २५) अक्षरसमाम्नाये उक्ता-
नां स्वराणां एकद्वित्रिसंख्याकमात्राभेदेन ह्रस्व
340 दीर्घप्लुतात्मकसंज्ञान्तरविधानायाह :-
(अ) ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१.२.२७) इति। ऊका-
लः, अच्, ह्रस्वदीर्घप्लुतः, इति छेदः। ह्रस्वं च दी-
र्घं च प्लुतश्च एतेषां समाहारः ह्रस्वदीर्घप्लुतः। द्व-
न्द्वैकवद्भावे एकवचनं सौत्रत्वात्पुंस्त्वं उ इति उ,
ऊ ऊ३ काराणां एकद्वित्रिमात्राणां सवर्णदीर्घः
तथा च उश्च ऊश्च ऊ३श्च वः वाशब्दस्य जसि परे
यणादेशो वः इति प्रथमाबहुवचने रूपं आमि ष
ष्ठीबहुवचने वामिति। तथा च वां कालः इव कालः
यस्य सः ऊकालः इति अच् इत्यत्र विशेषणम्॥
350 ॥(पैरनंबर २८) एवं च उ ऊ ऊ३ कारोच्चारण
कालसदृशकालवान् अच् ह्रस्वदीर्घप्लुतः इति
संज्ञां लभते अत्र यश्चात्र यथासंख्यो ज्ञेयः अत
श्च एकमात्रिकोच् ह्रस्वं द्विमात्रिकोच् दीर्घं त्रिमा
त्रिकः प्लुतः इति फलितः इति सूत्रार्थः तदुक्तं
वरदराजेन :- वां काल इव कालः सोऽच् क्रमाद्ह्रस्व
ह्रस्वदीर्घप्लुतसंज्ञः स्यात् इति इदं च फलितार्थक
थनं भाष्यादिषु वः कालः यस्य सः इत्येकवि
गृहीतं वः इति उ ऊ ऊ३ कारोच्चारणकालेन-

क्ष्यते तथाच उ१ उ२ उ३ ओकारोच्चारण काल एव कालः यस्य सः अच् क्रमेण ह्रस्वदीर्घप्लुतसंज्ञो भवतीति वृत्तं ॥
360

॥(पैर नंबर 28) तत्पश्चे आपाततः उकारोच्चारणकालात्मक कालवान् अच् ऊकारोच्चारणकालात्मककालवानच् ऊ३कारोच्चारणकालात्मककालवानच् इति ऊकाल शब्दार्थो ज्ञेयः अत्र उकारोच्चारणकालः एकमात्रा ऊकारोच्चारणकालः द्विमात्रा ऊ३कारोच्चारणकाल इव त्रिमात्रेति च तत्तत्संख्याक मात्रिकाणामेव क्रमेणोक्त संज्ञा भवति इति सूत्रार्थः ॥5॥

॥6॥ ॥7॥ ॥8॥

॥(पैर नंबर 29) एवं ह्रस्वदीर्घप्लुतात्मना त्रेधा विभिन्नानां स्वराणामेषां प्रत्येकशः उदात्तानुदात्त स्वरितात्मकावान्तर भेदमादाय नवविधत्वं प्रत्याययति सप्रत्येकमुदात्तादि भेदेन त्रिधा इति तत्र उदात्तादि संज्ञा विधायकानि सूत्राण्याह :-
370

(6) उच्चैरुदात्तः (1.2.29)

(7) नीचैरनुदात्तः (1.2.30)

(8) समाहारः स्वरितः (1.2.31) इति

अत्रेदमवधेयं वर्णोत्पत्ति स्थानानि ऊर्ध्वाधोभागयोः अवसितानि । (1) कण्ठः (2) तालुः (3) मूर्धा (4) दन्ताः (5) ओष्ठ (6) नासिका (7) जिह्वामूलं इति सप्त संति तत्र केषांचिद्वर्णानां क्रमशे कैकमेव
380

॥स्थाने केषां चिद्वर्णानां स्थानद्वयमपि संभवति न तु नस्तत्सवर्णसंज्ञा सूत्रविवरणावसरे विवेचयिष्यते तेषु स्थानेषु ताल्वादिरूपेषु ऊर्ध्वाधोभागनिष्पन्न अच् उदात्तसंज्ञिको भवति प्रथमसूत्रार्थः॥

॥(पैरनंबर 30) यद्यपि सूत्रेषु ऊकालोऽज्झ्रस्वदीर्घप्लुत इति सूत्रात् अच् इत्यनुवर्तितः उच्चैः नीचैः समाहारः इति पदे विशिष्यते उच्चैः नीचैः इति पदयोः समान्येन ऊर्ध्वाधोभागपरत्वेपि प्रकृते अच् संज्ञानां प्रक्रान्ततया उत्पत्तिस्थाने षूर्ध्वाधोभागयोर्ग्रहणं सिध्यति तत्तश्च उच्चैरिति

390

ताल्वादिषु ऊर्ध्वभागे उत्पन्नः अच् उदात्त इति उदात्तसंज्ञिको भवतीति प्रथमसूत्रार्थपरिपाटी तूरपते॥

॥(पैरनंबर 31) तथा नीचैरिति ताल्वादिस्थानेष्वधोभागेषूत्पन्नः अच् इति अच् प्रत्याहारघटकः अइउ इत्यादिस्वरः प्रत्येकं ह्रस्वदीर्घप्लुतात्मना त्रेधा विभिन्नस्वरः अनुदात्त इति अनुदात्तसंज्ञिको भवति द्वितीयसूत्रार्थः

॥(पैरनंबर 32) एवं समाहारः स्वरितः इति समाह्रियेते समुच्चीयेते यस्मिन् इति

400

अधिकरणे घञ् तथाच उदात्तानुदात्तात्मकवर्णधर्मद्वयस्यापि समुच्चयेन यस्मिन्नचि

सोच स्वरितइति स्वरित संज्ञिको भवतीति-
तृतीय सूत्रार्थः॥

॥(पेरनंबर ३७) उदात्वंच ऊर्ध्वभागनि
ष्पन्नत्वं। अनुदात्तत्वं याधोभाग निष्पन्नत्वं इति
भागद्वय निष्पन्नोच स्वरितसंज्ञिको भवतीति तृती
यसूत्रार्थः पर्यवसितः उदाहरणानि चैतेषां :-
अग्निमीळे पुरोहितं इत्यादि वेदवाक्येषु द्रष्ट
व्यानि एवं मुख्यावान्तरभेदाभ्यां नवविधानां म
ध्यां प्रत्येकं अनुनासिकत्वानुनासिकत्वाभ्यां पुन
र्द्वैविध्यमाश्रित्य अष्टादशत्वं प्रत्याययितुमाह
स नव विधो। पीत्यादिना॥॥८॥५॥॥४॥

॥१॥ ॥(पेर नंबर ३५) तत्रानुनासिकसंज्ञाविधा
यकं सूत्रमाह :-

(१) मुखनासिकावचनोनुनासिकः (१।१।८)
इति मुखनासिकावचनः, अनुनासिकः, इति
छेदः मुखसहिता चसा नासिकाच मुखनासिका
इति मध्यमपदलोपी समासः शाकपार्थिवादिवत्
उच्यते उच्चार्यते इतिवचनः मुखनासिकाभ्यां वचनः
मुखनासिकावचनः मुखनासिकावचनः इति कृ
द्योगाषष्ठीसमासः वर्णसंज्ञाप्रकरणात्तथाकर्ण
इति विशेष्यमुपतिष्ठते॥ वचनः

"(पेरनंबर ३८) एवंच मुखनासिका इति

मुखसहितनासिकयोच्चार्यमाणो वर्ण इति वर्णः अनुनासिक इति अनुनासिकसंज्ञो भवतीति सूत्रार्थः॥

॥(पेरनंबर ३६) तत्र ऌवर्णस्य दीर्घा नास्ति याचां ह्रस्वं नास्ति इति तेषां द्वादशैव भेदाः अइउक

५३० र्णानां तु ह्रस्वदीर्घप्लुतात्मना तदर्थं तत्रोदात्तानुदात्तानुदात्तस्वरितभेदैः नवधा विभिन्नानां अनुनासिकानुनासिकाभ्यां पुनर्द्वैधे आहत्य प्रत्येकमष्टादश भेदाः सिध्यन्ति तत्र ह्रस्वभेदाः षट् दीर्घभेदाः षट् प्लुतप्रभेदाश्च षट् इति विवेकः ऌवर्णस्य ह्रस्वप्रभेदाः षट् प्लुतप्रभेदाः षट् इति द्वादश भेदाः दीर्घभावेन तद्भेदषट्कस्याभावात् एवं यचामपि दीर्घप्लुताभावेन प्रत्येकं षट् भेदानां द्वादशविधत्वं चैतदाह, तद्वित्थमित्यादिना॥ [९]

५५० [१०] ॥(पेरनंबर ३७) अथैषां सवर्णसंज्ञाविधानायाह॥

(७) तुल्यास्यप्रयत्नं सवर्णम् (१।१।९) इति छेदः स्पष्टः तुल्यं च तुल्यश्च तुल्ये नपुंसकैकशेषः आस्ये भवमास्यं प्रकृष्टो यत्नः प्रयत्नः आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तुल्ये + आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नं इति विग्रहः॥

॥(पैरनंबर ३४) आस्यमिति आस्यशब्दान भवार्थे यत्प्रत्ययः ताल्वादिस्थानमित्यर्थः प्रकृष्टो यत्नश्चाभ्यंतरः नतु बाह्यः तस्य सवर्णसंज्ञायामनुपयुक्तत्वात् एतच्च यत्नद्वयं मूल एव विव्रियते स्पृष्टमिति ~~नोवर्णयोर्मिथः सावर्ण्यं~~ यत्नौ द्विधेत्यादिना समानौव र्णौ सवर्णौ स्तौत नपुंसकं॥ | यस्य तत

॥(पैरनंबर ३५) एवं च आस्यमिति ताल्वादिस्थानं प्रयत्न इति आभ्यंतरप्रयत्नस्य यस्य वर्णस्य वर्णान्तरेण तुल्यौ भवतः तेन तत् सवर्णमिति सवर्णसंज्ञं भवतीति सूत्रार्थः संज्ञेयमन्वर्था मिथः समानयोर्वर्णयोस्तदर्थत्वस्य वर्णपदेन निर्दिष्टत्वात् संज्ञानिर्देशक सवर्णपदघटकसमानपदस्य समानस्थानप्रयत्नकत्वमर्थः वर्णानां स्थानसाम्यं प्रतिपादयति अकुहेत्यादिना नासिकानुस्वारस्य इत्यन्तं आभ्यंतरं यत्नं विवृणोति स्पृष्टेत्यादिना विवृतमेवेत्यन्तेन बाह्यप्रयत्नं विवृणोति विवारस्संवार इत्यादिना। महाप्राणाः इत्यन्तेन तत्र आभ्यंतर प्रयत्नविवरणावसरे स्पृष्टं प्रयतनं स्पर्शानां इत्यत्र स्पर्शशब्दः ईषत्स्पृष्टमंतस्थानां इत्यत्र अंतस्थशब्दः ईषद्विवृतमूष्मणां इत्यत्र ऊष्मशब्दः विवृतं स्वराणां इत्यत्र स्वरशब्दश्च अज्ञातार्थकाः किंतु तेषां शब्दानां अर्थं विवृणोति कादयइत्यादिना अचः स्वराः इत्यन्तेन एवं स्थानविवेचनावसरे अकुहविसर्जनीयानां

'नासिका ऽ उपध्मानीयानामोष्ठौ जिह्वामूलीयस्य जिह्वाम्

470 मूलं नासिकानुस्वारस्य इति स्थलेषु लिखिताः विसर्जनी

योपध्मानीयजिह्वामूलीयानुस्वाराः अपि अज्ञाता

काविति तान् विवृणोति ऋकः इत्यादिना अँ आ इत्यत्र

च अःपराववनुस्वारविसर्गौ इत्यतः तेन अत्रत्य विसर्गशब्दः

स्थानविवेचनावसरोपात्त विसर्जनीयपरः शब्दः

न प्रकरणोपात्त स्पर्शादिशब्दार्थान् ज्ञात्वा आभ्यन्तर

अनंतरं आभ्यंतरप्रयत्नविवरणं स्थानविवे

चनं तु अँ चाध्यायीरन् विद्यार्थिनः॥ [10]

[11] ॥पिरंभवर ५०) स्थान विवेचनावसरेषु

चुटु, तुपु इति पर्याय भेदेन अकुहेत्यादौ उ

480 दितः वर्गीयवर्णाः उपात्ताः तद्वर्गीयवर्णान्तरा

णि यशब्देनोपात्तानि तेषामनुपात्तानां उपा

वश्यकं तत्तद्वर्गीयवर्णानां तत्तद्वर्गीयाः तु एव

समानस्थानतया तत् स्थाननिरूपणार्थमुपा

देयत्वात् मावे अइउणादि अक्षरसमाम्नायिक

सूत्रेषु अइउवर्णानां दीर्घप्लुतयोः लृकारस्य दीर्घा

भावात् प्लुतस्य यजमानां सवर्ण ग्रहणानां च अ

ग्रहणात् तेषां ग्रहणं प्रमाणमात्

(11) अणुदित्सवर्णस्य चाप्रत्ययः (1.1.69)

अण्, उदित्, सवर्णस्य, च अप्रत्ययः, इति छेदः

500 दः आस्मिन् सूत्रे अण् इति णकारमाद्य

लण् सूत्रस्य णकारपर्यन्तानां प्रत्याहारः उन्
प्रत्ययस्य सः उदित् प्रतीयते विधीयते इति प्र
त्ययः न प्रत्ययः अप्रत्ययः ग्राह्यं च अप्रत्ययः इति
अविधीयमानः अणिति अण् प्रत्याहारघटकीव
र्णः उदिति उकारेतः कु चु टु तु पु इति इत्यन्यत्र तत
मध्य सवर्णस्येति तत्र सवर्णस्य ग्राहको भ
वतीति सूत्रार्थः यद्यपि अण् प्रत्याहारः सर्व
त्र अइउण् सूत्रस्य णकारेणैव निष्पाद्यः अ
थापि अत्र ग्राहकशास्त्रेन यवलानां द्वयस्त
ल्य इति सूत्रयोरुपात्तानां केवलानां अनु

5 10

नासिकभेदस्यापि ग्राहकत्व प्रत्यायनार्थं ऋ
ऌवर्णयोः दीर्घप्लुत ग्रहणार्थं मचां प्लुत ग्रहणा
र्थं च लण् सूत्रस्य णकारपर्यन्तानां संज्ञा ह्रैया
अत एवोक्तं वृत्तिकृता अतो वाण् इत्यादिना द्वयो
र्द्वयोस्संज्ञे त्यते भिन्ना ॥ 11

[13] ॥(पैरनंबर 13) उत्तरत्र संधिप्रकरणस्य प्र
स्यमानतया तत्र संहितायां इत्यधिक्रियमा
णतया संहिताशब्दार्थज्ञानमावश्यकं ;

(14) परस्संनिकर्षः संहिता (1.4.109) इति

520

परः, सन्निकर्षः, संहिता, इति छेदः परः इति अ
व्यवधान पर्यवसितः अतिशयः अर्थः स्वच
र्णसंहिता प्रकरणानुरोधेन वर्णानामिति लभ्य

'सन्निकर्षसान्निध्यं मावंच परः इति वर्णानां अत्य
वहितत्व पर्यायातिशायात् सन्निकर्षः इति
सान्निध्यं संहितेति संहिता संज्ञं स्यात् इति
सूत्रार्थः तदाह वृत्तौ वर्णानामतिशयितसान्निधिः
संहितासंज्ञः स्यात् इति॥ ॥१२॥

॥13॥ संयोगसंज्ञामाह ÷

(१३) हलोऽनंतराःसंयोगः (१।१।७) इति
हलः, अनंतराः, संयोगः, इति छेदः नवि
द्यते अंतरं व्यवधानं येषामिति अनंतराः
अव्यवहित इत्यर्थः अर्थात् अजभिः इति
लभ्यते अचामेव हल्व्यवधायकत्वात्।
एवं च अनंतर इति अज् व्यवधानरहिताः
हलः इति हल् प्रत्याहारघटकाः वर्णाः सं
योगइति संयोग संज्ञिका भवंतीति सूत्रा
र्थः।,१३॥

530

॥१४॥ ॥ (पेरनंबर ५२) वापदांतस्येत्या
दौ संधिप्रकरणस्य सूत्रे पदपदार्थ ज्ञापनाय
याह ÷

540

(१४) सुप्तिङंतं पदं (१।४।१४) इति
सुप्तिङंतं, पदं, इति छेदः सुप् च तिङ्
सुप्तिङौ सुप्तिङौ अंते यस्य तत् सुप्ति
ङंतं इति विग्रहः तत्र तं इति शब्दयम।

णां पदं प्रत्येकमभिसंपद्यते इति न्यायेन अंत
पदं द्वन्द्वपदघटक सुप्तिङ्पदयोः प्रत्येकं शः संब
ध्यते सु इति स्वौजसादि सूत्रस्य सुप्रत्ययमा
रभ्य सुप्प्रत्ययस्य पकारेण सुप् प्रत्याहारः तेन च
स्वादीनां एकविंशतिप्रत्ययानां प्रातिपदिकोत्त
550 राणां ग्रहणं तिङ् इति च उक्तविधया तिङ् प्रत्य
याहारस्थानां अष्टादशानां धातूत्तराणां
प्रत्ययानां ग्रहणं एवं च सुप्तिङन्तमिति सुबन्तं तिङन्तं
च शब्दस्वरूपं पदमिति पदसंज्ञं भवतीति सूत्रार्थः॥ ।14॥

इति श्रीसाहित्यवेदान्तविदुषा राजा
धिराजयतिराजप्रीतिपात्रेण यति
शैले निवसता गोमठं तिरु
नारणैय्यंगार्यैरचकृतौ
लघुकौमुदीव्याख्यायां
560 बालबोधिन्याख्यायां व्या
ख्यायां संज्ञाप्रक
रणं समाप्तम्.

11-12-1939

— श्रीः —

- श्रीमते रामानुजाय नमः -

## — अथ संधिप्रकरणम् —

॥(पैरनंबर ५३) संधिप्रकरणेषु प्राधा-
न्येन (१) अच्संधिः (२) हल्संधिरिचेति संधि-
द्वयं सामान्यतः परिगण्यते तत्र (१) विस-
र्गसंधिः (२) अनुस्वारसंधिश्च अस्यैव च-
संधेरन्तर्भाव परिगण्यते लघुकौमुद्यां
स्फुटप्रतिपत्त्यर्थं विसर्गसंधिः पृथक् प्रदर्श्य-
ते तत्रच संधिषु (१) यण्संधिः, प्रसंगात्
(२) यरो द्वित्वादेशः (३) जस्त्वं (४) संयोगान्तलो-
पः (५) गत्वादेशः (६) यथासंख्यनियमः (७) गुण
संधिः (८) लोपसंधिः (९) वृद्धिसंधिः, प्रसंगात्
(१०) उपसर्गसंज्ञा (११) धातुसंज्ञा (१२) ऋकारयो
रादेशस्य रलपरत्वं (१३) पररूपसंधिः (१४) टि
संज्ञा (१५) सवर्णदीर्घसंधिः (१६) पररूपसंधिः
(१७) अनुनासिकसंज्ञिकानामचां इत्संज्ञा
(१८) सर्वादेशपरिभाषा (१९) अयवायावादेशसं-
धिः (२०) अवङादेशसंधिः (२१) प्लुतसंधिः (२२)
प्रगृह्यसंज्ञा (२३) प्रकृतिभावसंधिः (२४) चा-

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



दीनां प्रादीनां च निपात संज्ञा (२५) उआ

590 देश संधिः (२१) (बल) संधिः (२१) ह्रस्वादे

श संधि इच प्रतिपाद्यते॥

—अथ यण् संधिः—

॥15॥ पैर नंबर 44) नत्र यण् संधिरिति

अ इ उ ऋ लृ वर्णानां स्थाने असमस्वरेषु

परेषु यवरलाः आदेशा भवन्ति अत्र च सूत्रं

(५) इको यणचि (6.1.77) इति इकः,

यण्, अचि, इति छेदः इक इति षष्ठी यण्

600 णिति प्रथमा अचीति सप्तमी संहिता

यामित्यधिक्रियते इक्, यण्, अच्, इति

पदानि प्रत्याहार संज्ञाभूतानि तत्र प्रत्या

हारघटकवर्णपराणि इक इति षष्ठ्यं

नतया षष्ठी स्थाने योगेति परिभाषया

स्थाने पदेन संबध्यते अचीति सप्तम्यन्त या

त स्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषया [illegible]

व्यवहितन पूर्वस्य [illegible] उपस्थितेन संबध्यते॥

॥(पैर नंबर 45)॥ मातं च अचीति अच्प्र

त्याहारघटकवर्णाव्यवहितपूर्वस्य इक इति

610 इक् प्रत्याहारघटकवर्णस्य स्थाने यण् इति यण्

यण्प्रत्याहारघटकवर्णाः आदेशाभवंति संहितायां विवक्षितायां इति सूत्रार्थः। उदाहरणं:-
सुधी+उपास्यः = सुध्युपास्यः। मधु+अरिः = मध्वरिः। धातृ+अंशः = धात्रंशः। लृ+आकृतिः = लाकृतिः इति॥

[18] ॥ (पेर नंबर 48) एवमादिषु सूत्रेषु तत्तत्सूत्रकृतेषु विधिषु निमित्तांशः सप्तम्यंतेन प्रतिपाद्यते विधेयांशः प्रथमांतेन प्रायशः षष्ठ्यंतेन प्रतिपाद्यते सत्येवं प्रथमांतेन विधेय बोधकेन

620

प्रतीयमानो विधिः किं षष्ठ्यंतार्थस्य स्थाने उत सप्तम्यंतार्थस्येति संदेहे तद्व्यवस्थार्थमाह:-

(18) तस्मिन्निति निर्दिष्टेपूर्वस्य (1.1.66)
इति। तस्मिन्, इति, निर्दिष्टे, पूर्वस्य, इति छेदः तस्मिन्निति सप्तम्यंतानुकरणं इतिशब्दः तस्य अर्थपरतामवगमयति। निरशब्दः नैरंतर्यपरः। दिशिरुच्चरण क्रियः। एवं च तस्मिन्नितीति सप्तम्यंतार्थे निर्दिष्टे इति नैरंतर्येण

630

उच्चरिते सति पूर्वस्येति तत्पूर्वस्यैव कार्यं भवतीति सूत्रार्थः। तदाह वृत्तौ सप्तमीनिर्देशेनेत्यादिना ॥

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



मैरंतर्यं च अन्यवधानं नयु वर्णान्तरै नैव न दात्तर्णान्तरैस्येति उदाहरणं :
इको यणचीत्यादि सूत्रं न तहि यणादे शादिना विधीयमानं यणादेशादिरूपादि कार्यं अचीत्यादि सप्तम्यंतनिर्दिष्ट अच्प्रत्याहारघटकवर्णाद्यव्यवहित पूर्वस्य इगादेर्भवति ॥

6240· [17] ॥ (पेरनंबर 47) एवं इक्स्थानिक यणादेशस्य यण्संधिकार्यहेतोस्सिद्धेपि इक् यण्षु च प्रत्येकशो वर्णचतुष्टयस्य सद्भावेन स्थान्यादेशभावस्य अतिप्रसंगे (दधि + अत्र = दध्यत्र, मधु + अरिः = मध्यरिः इत्याद्यनिष्टरूपापत्तिः) स्यात् इति तत्परिहाराय स्थान्यादेशभावनियामकं धर्ममाह :-

(17) स्थानेन्तरतमः (1·1·50)
इति । स्थाने, अंतरतमः, इति छेदः ।
6240 स्थानं च प्रसंगः । न च प्रकरणात् तत्त्वस्तो हि ष्टवर्णानामिति सिध्यति
आन्तर्यं साहृश्यात्मकं अर्थादादेशः इत्याक्षिप्यते ॥
॥ (पेरनंबर 48) ॥ एवं च स्थाने

इति वर्णविधी सूत्रेषु उद्देश्यत योवा ज्ञानां वर्णानां उच्चारणप्रसंगे विधीयमान आदेश इति विधीयमान यणादि अंतरतम इति सदृशतम एव भवतीति सूत्रार्थः ॥

650 ॥(पेर नंबर ४९)॥ तथाच यण् संधौ इकारादीनां यकारादीनां उद्देश्यविधेय भावाक्रांतानां इचुयशानां तालव्यादि स्थानविवेक प्रकरणोक्त विधया ता ~~...~~ स्थानविधया कृतं सादृश्यमादायैव प्रवृत्तिर्ईयात्तश्च सुधी + उपास्यः इत्यत्र इकारस्य स्थाने तालुस्थानैकत्व साम्येन यकारसाव सुध्युपास्य इति भवति एवं मधु + अरिः धातृ + अंशः लाकृतिः इत्यादौ भवति ॥

660 ।१४।(॥ पेर नंबर ५०)॥ अत्र इकारादीनां स्थाने यणि कृते पूर्वस्य धकारादेः अनच् प्रत्ययत्वेन द्वित्व विधायकं शास्त्रमाह ÷

(१४) अनचि च (८.४.४७) इति अनचि, च, इति छेदः अचो रहाभ्यां द्वे इति सूत्रात अचः, द्वे, इति पद

दयमनुवर्तते। यरोऽनुनासिकेऽनुनासि
को वा इति सूत्रात् यरः वा इति चानुवर्त
ते। न + अच् = अनच् + तस्मिन् = अनचि
670 इति विग्रहः। नञत्र प्रसज्यप्रतिषेधः
न तु पर्युदासः। प्रसज्यप्रतिषेधो नाम :-
समासघटकस्यापि नञः पृथक् क्रि
यान्वयसंपादनं पर्युदासस्तूत्तरपदान्व
यः। तदुक्तं :—

प्रसज्यप्रतिषेधोऽयं।
क्रियया सह यत्र नञ्।
पर्युदासस्तु विज्ञेयः।
यत्रोत्तरपदेन नञ्॥ इति

अच इति पंचमी तस्मादित्युत्तरस्येति
680 परिभाषया अव्यवहितोत्तरस्येत्यर्थो
पस्थितिः। यर इति षष्ठी स्थानेयोगे
ति परिभाषया स्थानपदार्थसंबन्धः।
अचीति सप्तम्यंततया तस्मिन्निति निर्दि
ष्टे इति परिभाषया अव्यवहितपूर्वस्य
त्यर्थोपस्थितिः। अतोत्र विधेः प्रस
ज्यप्रतिषेधत्वेन विधिपरं निषेधपरं
च पृथक् पृथगेव वाक्यद्वयं संपद्यते।
अनुवृत्तानि पदानि वाक्यद्वये निषेध

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



वाक्येपि संत्येव ॥

690 ॥(पेर नंबर 51)॥ तथाच अच इति अच् प्रत्याहार घटकवर्णाव्यवहितोत्तरस्य यर इति यर् प्रत्याहार घटक वर्णस्य स्थाने द्वे इति द्वित्वमिति विकल्पेन भवतीति विधिवाक्यार्थः ॥

॥(पेर नंबर 52)॥ अचीति अच् प्रत्याहार घटकवर्णाव्यवहित पूर्वस्य द्वित्वं नेति द्वित्वं न भवतीति निषेधवाक्यार्थः ॥ —— जश्त्व संधिः ——

[19] ॥(पेर नंबर 53)॥ एवमत्र धकारस्य द्वित्वे सुध्ध् य्+उपास्य इति स्थिते पूर्वस्य धकारस्य जश्त्व विधायक शास्त्रम् - हि ।

700 (19) झलां जश् झशि (8.4.53)
पदच्छेद विभक्ति आदि भावः यथासंधि वृत्तौ तद्विधया न्वयं ज्ञातव्यः ॥

॥(पेर नंबर 54)॥ एवंच झलामिति झल् प्रत्याहार घटकवर्णानां स्थाने झशीति झश् प्रत्याहार घटकवर्णे परे जशीति जश् प्रत्याहार घटकवर्णाः आदेशा भवन्तीति सूत्रार्थः । अनेन

710

च पूर्वधकारस्य झलप्रत्याहारघटकत्वेन झश्यवहितपूर्वत्वेच जशप्रत्याहारघटक दत्य स्थानकत्वेस दृशत्वेन स्थानकृत कृतसादृश्य दकारश्च भवति ॥

[20] "(पैरनंबर 55)" तथाच सुध् ध्य उपास्यः इति स्थिते यकारस्य संयोगान्तत्वेन तल्लोपे प्रवृत्ते विधायकमाह :

(20) संयोगान्तस्य लोपः (8.2.23) इति

72. संयोगान्तस्य, लोपः, इति, छेदः। पदस्येत्यधिक्रियते संयोगान्तपदं पदपदेन सार्कं अभेदेनान्वयति संयोगः अन्ते यस्य तत्संयोगान्तं

"(पैरनंबर 56)" एवंच संयोगान्तस्येति स्त्रांतिमसंयोगत्वविशिष्टस्य पदस्येति पदसंज्ञिकस्य लोपः इति लोपो भवतीति सूत्रार्थः।

पैरनंबर 57 [21] ॥ अनेनच सुद्ध्य + य + उपास्यः इत्यत्र सुद्ध्यय् कृतस्य यासंधेः संयोगान्तस्य पदस्य विशिष्टस्य लोपे प्रसक्ते लोपविधेः तत्तन्त्रस्य यकारमात्रविषयत्वनियामकां परिभाषामाह

73.

(20) अलोऽन्त्यस्य (1.1.52) इति
अलः, अन्त्यस्य, इति छेदः पूर्वो स्थाने
योगोऽत्र परिभाषा षष्ठी स्थाने ~~योगा इत्यतः~~
इति पदमनुवर्तते षष्ठी पदं, तच्चोपात्तया
विपरिणाम्यते विनिर्दिष्टस्येत्यध्याह्रियते
अन्त्यस्येत्यलइत्यस्य विशेषणं स्थाने विधी
यमानः आदेशः इति लभ्यते॥
॥(पेरनंबर 58)॥ एवं च स्थाने षष्ठ्या
निर्दिष्टस्येति स्थानषष्ठी निर्दिष्टस्य
स्थाने विधीयमानः आदेशः अंत्यस्ये
ति स्थानषष्ठी निर्दिष्टान्त्यस्य अलः
इति अलमात्रस्य स्थाने भवतीति
सूत्रार्थः॥
॥(पेरनंबर 59)॥ अनेनैव संयोगा
न्तस्य लोपः इति सूत्र विहित संयोगान्त
पदस्थानिकः लोपः स्थानपदषष्ठ्यन्त
शब्द निर्दिष्टस्य सर्वस्य इत्येतदन्त्य
स्य यकारस्यैव भवतीति सिध्यति अन्त
इत्येतत्परिभाषा सहकृतस्य संयोगा
न्तस्य लोपः इति सूत्रस्य संयोगा
न्त्य वर्णस्य लोपः इति सिध्यति एवमे
व विधिसूत्रेषु सर्वेष्वपि स्थानषष्ठी

।निर्दिष्टत्वात्स्थेव तत्र द्विधीर्भवतीति निर्णयात् तत्तन्ने *नसरिभ. बाक्य व्यावर्त्य गृह्यैव णेनैव सूत्रार्थपरिष्कारः साम्प्रदायिकः॥

॥(पैरनंबर८०)(वार्तिकसूत्र।) अनेन यकारादेरत्यवर्णस्य लोपेप्रासुद्धुपास्य (२) मद्धरिः इत्यादुनि प्राप्तापत्त्या तन्निवारणार्थमाह:-

· वा·(१)· यणः प्रतिषेधोवाच्यः इति सात्र वार्तिके यण् स्थानिकस्य संयोगान्त्यलोपस्य प्रतिषेधःकृतव्य इत्यर्थः इत्यनेन वार्तिकेन यण्लोपप्रतिषेधे (१)सुद्ध्युपास्यः (२) मध्वरिः (३) धात्रंशः (४) लाकृतिः इत्यादि अभिमतरूपं सिध्यति इति

इति संधिप्रकरणे
यणसंधिप्रक
रणं समा
सम.

——— ००० ———

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



(अथ एजादेजादेश
संधिप्रकरणम्)

[21] ॥(पेर नंबर 61)॥ एवं संधिप्रकरणे प्रोक्ते तत्र संदर्भोपात्तविधयो यण्संधेः प्रासंगिकत्वात् हिरवज्रस्तत्र लोपकर्मधीन विमिरय इत्येतत्, विष्णु + ए, नै + अकः पौ + अकः, इत्यादौ एचां यान्तवांतादेश विधायकं शास्त्रमाह ÷

(21) एचोऽयवायावः (6.1.78) इति एचः, अय वायावः, इति छेदः इकोयणचीति सूत्रादचीत्यनुवर्तते एच इति षष्ठी अयवायावइति प्रथमाबहुवचनम्। अय् अव्, आय्, आव् इत्येतेषां चतुर्णां द्वंद्वे प्रथमाबहुवचनम् अचीति सप्तम्यंतं तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषया अव्यवहित पूर्वस्येत्यस्योपस्थितिः एच इति षष्ठ्यंतत्तया षष्ठी स्थानेयोगेति परिभाषया स्थानपदार्थसंबंधः॥

॥(पेर नंबर 62)॥ एवं च अचीति अच् प्रत्याहारघटकवर्णाव्यवहितपूर्वस्य एच इति एच् प्रत्याहार घटकस्य ए ओ ऐ औ इति वर्णचतुष्टयस्य स्थाने अयवाया

वइति अय् अव् आय् आव् इत्यादेशा
भवन्तीति इति सूत्रार्थः॥ अत्र चतुर्णां
शब्दवर्णानां स्थाने अयादयमादेशा वि
हिताः तत्र कस्य स्थाने को भवतीति
संदेहेन अतिप्रसक्तो तन्निवारणार्थं यथा
संख्यानियममाह :-

[22] ॥(पैरनंबर 63)" यथासंख्यमनु
देशस्समानां" (1.3.10) इति —

संख्यामनतिक्रम्य यथासं
ख्यं इति पदार्थानतिवृत्तो अव्ययीभा
वः अनुदेशो विधिः साम्यं च शब्दवा
च्यगतत्वासंबंधि प्रतिसंबंधित्वादिना
ग्राह्यं ॥

॥ (पैरनंबर 64)॥ शब्दं च समान
मिति उद्देश्यविधेयत्वादिना संबंधिप्र
तिसंबंधिभावेन साम्यं गतानां अनु
देश इति विधिः यथासंख्यमिति न
न्तसंख्यानुरोधेन प्रवर्तत इति सूत्रार्थः
तदाह :- समसंबंधी विधिर्यो यथा
संख्यं स्यादिति एवमनया परिभाषया
शब्दादेशसूत्रे प्रथमस्य प्रथमः द्वितीय
स्य द्वितीयः इत्येवमादिना शब्दाका

दीनां संख्यानुरोधेनैव अयादयादेशो ह
रये विष्णवे इत्यादि पूर्वोक्तोदाहरणसि
द्धिः ॥ २२ ॥

२३ ॥ (पेरनंबर ६५) ॥ एवं वांतादेशप्रस
क्त्या अन्यत्रापि वांतादेशसंभवं संगमयि-
तुमाह :-

(२३) वान्तो यि प्रत्यये (६.१.७९) इति
वान्तः, यि, प्रत्यये, इति छेदः । वः अन्ते य
स्य सः वान्तः अव्, आव्, इत्यन्यतर
आदेशः प्रत्यये इति सप्तम्यन्ततया तस्मि
न्निति निर्दिष्टेत्यादि परिभाषया अव्यवहि
तपूर्वस्येत्युपस्थितिः यीति प्रत्यये इत्यत्र
विशेषणं विशेषणवान् यस्मिन्नित्यादि
परिभाषया तदादिपरं । एचोऽयवायाव इति
सूत्रात् एच इत्सनुवर्तमानं ओकारौका
राभ्यामेव स्थानत्वेनान्वेति ॥

॥ (पेरनंबर ६६) ॥ एवंच यि प्रत्यये इति
यादिप्रत्यये अव्यवहितपूर्वस्य एच इति
सामर्थ्यात् ओकारौकारान्यतरस्य स्थाने वांत
इति वकारांतः अव् आव् इत्यन्यतरा
देशो भवतीति सूत्रार्थः तथाच तस्मि
न्निति निर्दिष्टे पूर्वस्य गो । शब्दात् य प्रत्यये

गो + य इत्यत्र अनेन सूत्रेण ओकारस्य अवादेशे गव्यं इति भवतीति। एवं नौ + य = नाव्यम् गो + याति = गव्यूतिः इति च भवति ॥ [23]

{इत्येजादेश संधिप्रक रणं समाप्तम्}

भा॥ वं॥ नरसिंहाचार्यः
यादवगिरिः
13-9-40

{अथ गुणसन्धि प्रकरणम्} 13-9-40

[25] ॥(पेर नंबर 67)॥ अथ गुणसंधिविधानाय प्रथमं गुणसंज्ञाविधायक शास्त्रमाह:-

(25) अदेङ्गुणः (1.1.2) इति

अदेङः, गुणः, इति छेदः अच्च एङ् च अनयोस्समाहारः अदेङ् इति विग्रहः एङ् एवं प्रत्याहार घटकयोः एदोतोः ग्रहणं ॥

॥(पेर नंबर 68)॥ एवं च अदिति अकारः एङिति एकारौकारौ चेति इमे त्रयो वर्णाः गुणः इति गुणसंज्ञका भवंतीति सूत्रार्थः अत्र ॥

[25] ॥(पेरनंबर 69)॥ अत्र अदिति अकारः ग्राहकः(॥) "अणुदित्सवर्णस्य चाप्रत्ययः" (1.1.69) इति शास्त्रबलेन तद्दीर्घादीनां सवर्णानां सवर्णानां ग्राहकस्स्यात्, तदा च वृद्धिसंज्ञाविषयभूतस्य आकारस्य गुणसंज्ञाप्रसक्तौ संज्ञयोस्सांकर्यापत्तिः इति तद्वारणार्थं अतस्य ह्रस्वाकारमात्रबोधे नियामकं शास्त्रमाह —

(26) तपरस्तत्कालस्य (1.1.70) इति

तपरः, तत्कालस्य, इति छेदः।

तः परः यस्मात् सः तपरः, तात्परः तपरः इति च तपरपदं तत्पुरुषादिना द्वेधापि विगृह्यते । स एव कालः यस्य सः तत्कालः तस्येति विग्रहः अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रात् अणित्यनुवर्तते एवं च अस्मिन् शास्त्रे तपर इति तकारपरकः तकारात्परश्च अण् तत्कालस्येति निर्दिष्टस्य अचः यः कालः तत्कालमात्रोच्चार्यमाणस्य अणः ग्राहको भवतीति सूत्रार्थः ॥

॥(पेरनंबर 70)॥ तथाच यत्र तकारात्परः तकारपरको वा अण् एकमात्रिकः

तत्र ग्रहणकशास्त्रबलात् प्राप्तं। द्विमात्रिकस्य त्रिमात्रिकस्य च ग्रहणमनेन व्यावर्तितं भवति। तथा यत्राण् तपरक द्विमात्रिको निर्दिश्यते तत्र एकात्रिमात्रिकयोः ग्रहणं न भवति एवं त्रिमात्रिकस्यापि ज्ञेयं नेम अत्, इत्, उत्, ऋत्, इत्यादि यः उदात्तानुदात्त स्वरितभेदेन च प्रत्येकशः वर्णानां ज्ञानत्व अष्टादशानां ऋदितित्रुद्धादशानां ऋकार लृकारयो स्सवर्ण्यात्॥

॥(पेर नंबर 71)॥ प्रकृते च अदेङ् गुणः इति गुणसंज्ञाविधायकसूत्रस्थं अदर्दं तपरक ह्रस्वाकारमात्र बोधकामीति न संज्ञान्तय सांकर्यं॥ 25

26 ॥(पेर नंबर 72)॥ गुणसंधीविधायकं सूत्रमाह :—

(26) आद्गुणः (6.1.87) आत् गुणः इति छेदः इकोयणचीति सज्जावचीत्यनुवर्तते आदिति पंचम्यंतं ननु तपरं तस्मात् षाड्शानां अकार भेदानां ग्रहणं भवति मन: पूर्वपरयोरित्यधिक्रियते संहितायामिति चाधिक्रियते विवक्षितायामिष्टया दृश्यते पूर्वपरयोरित्यधिकारबलात्

तस्मादिति तस्मिन्निति च परिभाषा द्व यं नात्र प्रवर्तते अचीति सति सप्तमी आदि अवाने बोधितानां पञ्चमी पूर्वपरयो रिति षष्ठ्यन्ततया षष्ठीस्थाने योगेति प रिभाषया स्थाने इत्युपस्थितेन संबध्यते ॥

॥ (पेरनंबर 73) ॥ एवं च आद्गुणस्व र्णात्र अचीति अच प्रत्याहारघटक वर्णे परे सति संहितायामिति संहितायां विवक्षि तायां पूर्वपरयोरिति पूर्वस्य अकारस्य प रस्य अचइच स्थाने एकइति एकएव गुण इति गुणसंज्ञिकोवर्णः आदेशोभ वतीति सूत्रार्थः ॥

उदाहरणम् :-

उप + इंद्रः इत्यत्र प्रकाशेत्तर वृत्ते रकारात् उत्तरपदादिः इकारः पकारो वर्ति ते अत्र अकारः पूर्वः इकारः परः किं च अकारः कंठ्यः इकारस्तालव्यः अन योस्थाने गुणसंज्ञिकानां अकार एका र ओकाराणां मध्ये कण्ठतालुस्थानि कः कण्ठतालुस्थानिकः एकारः आदेशोभ वति स्थानसादृश्यात् नतुतं स्थानेंतरत

मइति सूत्रेण तदुक्तं उपेन्द्रः इति ॥
एवं गंगा उदकमित्यत्र कण्ठस्था
नीकस्य आकारस्य ओष्ठस्थानिकस्य
उकारस्य च स्थाने गुणसंज्ञिकः स्थानत,
आंतरतम्यात् कंठोष्ठस्थानिकः आदि
शो भवति तदाह गंगोदकमिति ॥

[87] ॥ (पेर नंबर 72) ॥ वक्ष्यमाणसूत्रस्य स्पष्टा
पक्षानाय स्प्रत्याहारसिद्ध्यर्थं लण्सूत्र
स्थाकारस्य इत्संज्ञाप्रत्यायकं इत्संज्ञा विधा
यकं सूत्रमाह :—

(87) उपदेशेऽजनुनासिक इत् (1.3.2)

उपदेशे, अच्, अनुनासिकः, इत्, इति
छेदः संज्ञाप्रकरणात् संज्ञेति लभ्यते उपदे
शः प्राथमिकोऽवदेशः विषयभूत धातु
सूत्रादि उपशब्दः प्राथम्यार्थकः भावे
घञ् तस्यच विषयतया धात्वादिवृत्ति
त्वात् तदुक्तं :—

धातुसूत्रगणोणादि ॥
वाक्यलिंगानुशासनम् ॥
आगमप्रत्ययादेशाः ॥
उपदेशाः प्रकीर्तिताः ॥

उपदेशे इति अनुनासिक इति अजित्य

न्यत्राविशेषणतयाभेति ॥

॥ पेरनंबर ७५ ॥ एवंच उपदेशो इति धातुसूत्रादिवृत्तिः अनुनासिकः इति ॥ अनुनासिकसंज्ञिकः अच् इति अच्प्रत्याहारस्थ टकवर्णः इदितिइत्संज्ञिकोभवतीति सूत्रार्थः तदाह :- उपदेशे अननुनासिकोजित्संज्ञः स्यादिति ॥

॥पेरनंबर ७६॥ उपदेशविषयभूतानां अचां अनुनासिकत्व निर्णायकप्रमाणमाह :- प्रतिज्ञानुनासिक्याः पाणिनीयाः इति प्रतिज्ञायते अभ्यपगम्यते इतिप्रतिज्ञा नित्यस्त्रीलिंगोयं आतश्चोपसर्गे इत्याकारान्तात् प्रतीत्युपसर्गपूर्वक ज्ञाधातोः कर्मण्यङ् अभ्युपगम्यमानामित्यर्थः आनुनासिकस्य भावः आनुनासिक्यं येषांते प्रतिज्ञानुनासिक्याः पाणिनीयाः पाणिनिशिष्याः अनुनासिक्यं पाणिनिशिष्यपरंपरया इदानीं तनैः ज्ञातव्यमित्यर्थः लक्षण सूत्रस्थावर्णस्यं पाणिनिशिष्यपरंपरया अनुनासिकत्वमभ्युपगम्यस्यद्ध इतनया सूत्रेणानेन नस्येत्संज्ञायां

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



हयवरट्‌सूत्रस्थ रेफस्य अनेनसाकं रइति प्रत्याहारे उत्तरसूत्रस्थ रपरत्वस्य रकारलकारउभयपरत्वं सिध्यति॥

[पृ४] ॥(पैरनंबर 77)॥ एवं घटकज्ञानस्य घटितवाक्यार्थज्ञानस्य पदार्थज्ञानेकारणकत्वनियमानुरोधेन इदानींपदार्थज्ञाने जाते तद्विशिष्टं सूत्रमाह:–

(२४) उरण्‌ रपरः (१।१।५१)

उः, अण्‌, रपरः इति छेदः उःअण्‌ इति पदत्रयं गुणवृद्ध्यादिसूत्रसिद्धऋकारस्थानिकअणादेशः अनुवादरूपं अंनुवादे परिभाषाणां अनुपस्थित्या स्थाने पदं स्थानेऽन्तरतमइति सूत्रादनुवर्तते अत्र अण्‌पदं पूर्वेणणकारेण प्रत्याहारः रः परः यस्मात्‌ सः रपरः इति विग्रहः उः इति ऋकारस्य षष्ठ्यन्तपदं ऋ इति त्रिंशतः संज्ञेति अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रे उक्तं॥

॥(पैरनंबर 78)॥ एवं च उरिति त्रिंशतः संज्ञाभूतस्य साधारसमाम्नायिकस्य तत्र सूत्रेषु उद्देश्य

नियोपान्तस्य अकारस्य स्थाने इति प्र
संगे सति उच्चारणप्रसंगे आणीति आ
दिश्यमानः अण् प्रत्याहारघटको वर्णः
रपरइति रपत्याहारघटक रेफ लकारा
न्यतरपरको भवतीति सूत्रार्थः।
कृष्ण + ऋद्धिः इत्यत्र अकार ऋकार
यो स्थाने आद्गुण इति गुणविधायक
सूत्रेण अकारात्मके गुणे स्थाने स्था
नत आन्तरतम्यात् आदिष्टे तस्य
प्रकृतिसूत्रेण रपरत्वे कृष्णर्द्धिरि
त्युदाहरणम् एवं तव + लृकारः इत्य
त्र अकार लृकारयो स्थाने तेनैव
गुणसन्धिसूत्रेण स्थानत आन्तर त
म्यात् आदिश्यमानः अकारः प्रकृ
तसूत्रेण लपरो भवतीति व्यवस्था

—इति— [28]

[29] अथ लोपसन्धिः —
दिसंबर 79

हरे + इह। विष्णो + इह इत्यादी
नां। एचोयवायाव इति वान्तयादे
देशयोः कृतयोः तत्रत्य यकारवका
र लोपविधायकं सूत्रमाह :—

(२९) 

लोपः शाकल्यस्य (८.३.१९) इति ।
लोपः, शाकल्यस्य, इति छेदः भोभगो
अघो अपूर्वस्य इति सूत्रात् अपूर्वस्य
अशीति चानुवर्तते पदस्य इत्यधिक्रियते
व्योर्लघु प्रयत्नतरः शाकटायनस्य इति
सूत्रात् व्योरित्यनुवर्तते पदस्येति अपू
र्वस्येति च द्विवचनान्त तया परिणते
व्योरित्यनेन संबध्येते अः पूर्वो ययो
स्तौ अपूर्वौ तयोरिति विग्रहः पद
स्येति विशेषणात् तदन्तलाभः शा
कल्य ग्रहणं विकल्पार्थं अशीति सप्त
म्यन्तं तथा तस्मिन्निति निर्दिष्टे पूर्व
स्य इति परिभाषया अव्यवहित पूर्वस्य
त्युपस्थितिः ॥

॥ (पेरनंबर ४०) - " सावृ च अशीति
अशू ष्ठत्या ध्रुवध्रुतकर्षणी। व्यवर्हि
तपूर्वयोः अपूर्वयोरिति अवर्णपूर्वक
योः पदस्येति पदान्तयोः व्योरिति
वकारयकारयोः स्थाने लोपइत्य
नुवर्तिणं शाकल्यस्येति शाकल्य
मते तु (विकल्पेन) भवतीति
सूत्रार्थः ॥ हरे + इह २ हरय इह

इति स्थिते अनेन सूत्रेण यकारस्य
विकल्पेन लोपे इर ईह् ह्व यिह्
इति च रूपद्वयं सिद्धं एवं विष्णो+इह
विष्ण इह विष्णाविह इत्यादि
[30] "(पैरनंबर 81) "एवमादिस्थ
लेषु यालोपपक्षे पूर्वोत्तरस्वरयोः
गुणादिसंधिप्रसक्तौ तन्निवारणार्थं गुणादि
संधिविधायकशास्त्रापेक्षया अस्य लोप
विधायकशास्त्रस्य असिद्धत्वं। इति सू
त्रमाह ॥

(30) पूर्वत्रासिद्धं (8.2.1) इति
पूर्वत्र, असिद्धं, इति छेदः, पूर्वत्रेति
सप्तम्यान्तं पूर्वपदं पूर्वशास्त्रपर
इदं शास्त्रमिति असिद्धमित्यर्थः अत्र
तत्तच्छास्त्रमेव विशेष्यतयोपा
दीयते सिद्धिरस्त्वज्ञानदृष्टिरिति
यावत् इदं च सूत्रं अष्टाध्याय द्वि
तीयपादारम्भस्य स्वदेशवाक्यार्थ
बोधोत्तरं तिवा स्वेषु सर्वेष्वेव सो
त्तरसूत्रेषु अधिक्रियते ॥

"(पैरनंबर 82) एवं च स्व
देशे पूर्वत्रेति सपादसप्ताध्यायी

स्थे पूर्वशास्त्रेगुणवृद्ध्यादौ प्रवर्तमानेइदं
शास्त्रमिति त्रिपादीस्थं यवलोपविधा
यकं शास्त्रमसिद्धमिति दृष्ट्या विषयीभूतं
भवतीति सूत्रार्थः एवमुत्तरसूत्रेष्वपि न
नत्सूत्रजालशेषत्वेनाद्वितीयमानमिदं सू
त्रं त्रिपाद्यामप्यविशेषेण पूर्वस्मिन्शास्त्रे
प्रवर्तमानेइदं शास्त्रमसिद्धमिति पूर्वंप्रति
परशास्त्रस्य असिद्धत्वं बोधयति प्रकृते
च विष्णइह हरइहेत्यादौ लोपःशाक
ल्यस्य इति लोपविधायक त्रिपादीस्थ
शास्त्रस्य आद्गुणः इति सपादसप्ताध्या
यीस्थ गुणादिसंधिविधायकशास्त्रापे
क्षया असिद्धत्वेन गुणादिकार्यं न प्रव
र्तते पूर्वापरस्वरयोर्हि गुणः तयोः
पौर्वापर्यं च यवलोपेनैव सिध्यति तद
सिद्धौ यलोपादर्शनान् स्वरयोर्व्यव
हितपौर्वापर्यरूपनिमित्ताभावेनआ
द्गुणादिशास्त्राणामप्रवृत्तिरिति सिद्धं॥

{ इति लोप
सन्धिः
उपसस्ता }

{अथ वृद्धि सन्धिः}
{उपपद्यस्यते}

[31] ॥ (पेर नंबर ९३) ॥ वृद्धिसंधी विधायकोत्तर सूत्रस्थ वृद्धिपदार्थज्ञानाय वृद्धि संज्ञाविधायकं सूत्रमाह :—

(31) वृद्धिरादैच् (1.1.1.) इति ।

वृद्धिः, आदैच्, इति छेदः, आच् ऐच् अनयोः समाहारः आदैच् ॥

॥ (पेर नंबर ९४) ॥ एवं च आदिति आकारः ऐजिति च प्रत्याहार घटकवर्णौ ऐकारौकारौ च वृद्धिरिति वृद्धिसंज्ञिको भवतीति सूत्रार्थः ॥ [31]

[32] ॥ (पेर नंबर ९५) वृद्धिसंधि सूत्रमाह :— (32) वृद्धिरेचि (6.1.88) इति । वृद्धिः, एचि, इति छेदः आद्गुणः इति सूत्रात् आदिति पञ्चम्यन्तमनुवर्तते तच्च तपरकरणबलात् पूर्वपरयोरित्यादी क्रियते तच्च गृहणकशास्त्रबलात् दीर्घदीनामपि ग्राह्कमेव अत एव आद्गुण इति सूत्रवृत्तौ अवर्णादित्युक्तं वृत्तिकारेण ॥

॥ (पेर नंबर ९६) ॥ एवं च आदित्यवर्णा

तत् राचीति राच् प्रत्याहारः घटकवर्णेपरे सति पूर्वपरयोः इति पूर्वस्य अवर्णस्य परस्य राच इच स्थाने वृद्धिः इति वृद्धिसंज्ञिकः राकः इति राकोवर्णः आदेशो भवतीति सूत्रार्थः॥ —

यथा कृष्ण + रौकत्वं इत्यादेः कृष्णौकत्वं गंगा + ओघः = गंगौघः देव + ऐश्वर्यं = देवैश्वर्यं कृष्ण + औत्कं = कृष्णौत्कमि त्यादिकं उदाहरणानि अत्र कृष्णौकत्वं देवैश्वर्यमित्यनयोः पूर्ववर्दान्त्यः इस्वाकारः गंगौघः कृष्णौत्कमित्यनयोः पूर्वपदान्तीमः आकारः। एवं रा ओ रौ ओ इत्येषां चतुर्णां आचे वर्णानां क्रमेण चतुर्ष्वपुदाहरणेषु राकैकस्य उत्तरपदादिमत्व वृद्धिरादैक्वर्णाः वृद्धिरादैच इति सूत्रेण आ रौ ओ इति त्रय राव अवगताः तेषु रौकारोकारयोर्वैवात्र प्रवृत्तिः आन्तरआन्तरम्यात् यत्र एकारैकारयोः परवर्णत्वं तत्र तयोः कंठतालुस्थानिकतया तादृशः ऐकार एवादेशः यत्र ओकारौकारयोः परवर्णत्वे तत्र औकार एव तयोः कंठोष्ठस्थानिकत्वात्

तेषु उदाहरणेषु सर्वत्र 'आद्गुणः' इति गुणसंधिः प्राप्तः तस्य अच् मात्रनिमित्तत्वेन औत्सर्गिकत्वात् उत्सर्गः सा तु अन्यमुत्सर्गतः प्राप्तत्वात् तथापि राज निमित्तकस्य अस्य वृद्धेः विशेषात्मकतया उत्सर्गापवादन्यायेन गुणापवादत्वमिष्यते ॥

Patti Chellayya
Iron Merchants
Pattivari St
Ongole.
Prakasam - Dt
(A.P.)

Sri Parasara Sudarsana Bhatta
230, South Uttara Street
Srirangam.
Tiruchirapalli - Dt
(Tamil nadu)

